क । पक्षिभेदे चरणायुधे १ताम्रचूडे स्त्रियां जातित्वात् ङीष् । तस्य शुभाशुभलक्षणमुक्तम् बृह०सं० यथा— "कुक्कुटस्त्वृजुतनूरुहाङ्गुलिस्ताम्रवक्त्रनखचूलिकः सितः । रौति सुस्वरमुषात्यये च यो वृद्धिदः स नृपराष्ट्रवाजिनाम् । यवग्रीवो यो वा वदरसदृशो वापि विहगो बृहन्मूर्धा वर्णैर्भवति बहुभिर्यश्च रुचिरः । स शस्तः सङ्ग्रामे मधुमधुपवर्णश्च जयकृन्न शस्तो योऽतोऽन्यः कृशतनुरवः खञ्जचरणः । कुक्कुटी च मृदुचारुभाषिणी स्निग्धमूर्तिरुचिराननेक्षणा । सा ददाति सुचिरं महीक्षितां श्रीयशोविजयवीर्यसम्पदः" ।
तन्मांसगुणा भावप्र० उक्ता यथा "कुक्कुटो बृंहणः स्निग्धो वीर्य्योष्णोऽनिलहृद्गुरुः । चक्षुष्यः शुक्रकफकृत् बल्यो वृष्यः कषायकः । वातपित्तक्षयवमिविषमज्वरनाशनः" । अभक्ष्यप्रकरणे ग्राम्यकुक्कुटस्याभक्ष्यत्वमाह मनुः "छत्राकं विड्वराहं च लशुनं ग्राम्यकक्कुटम्" २तृणोल्कायां (उको) ३कुक्कुभखगे च ४वह्निकणे स्फुलिङ्गे हेम० । स्वार्थे क तत्रार्थेषु मेदि० । "शूद्रजातो निषाद्यां तु स वै कक्कुटकः स्मृतः" मनूक्ते निषादीजाते शूद्रपुत्रे च

**कुक्कुट(टी)व्रत** न० भाद्रशुक्लसप्तम्यां कर्त्तव्यव्रतभेदे "भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या । स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम् । पूजयेच्च तदा तस्या दुष्प्राप्यं नैव विद्यते" ति०त० भवि०पु० । इदं कुक्कुटीव्रतमिति ति० त० रघुनन्दनः

**कुक्कुटमण्डप** काशीस्थे मुक्तिमण्डपे स्थाने । तस्य तन्नाम कारणकथा च काशी० ९८ अ० दर्शिता यथा— "कैवल्यमण्डपस्यास्य भविष्यद्वावरे हरे! । लोके ख्यातिर्भवित्रीयमेष कुक्कुटमण्डपः" इति शिवोनोक्ते तद्विषये हरिप्रश्ने यथा तस्य कुक्कुटमण्डपनामप्राप्तिस्तथेतिहासो वर्णितः । तत्र चण्डालतः प्रतिग्राहकविप्रस्य सुतद्वयपत्नीभ्यां सहितस्य कीकटे कुक्कुटयोनित्वप्राप्तिमुपवर्ण्य तस्य मरणकाले काशीस्मरणजात् पुण्यात् कुक्कुटयोनिगतावपि काशीप्राप्त्या मुक्तिरित्युक्तम् यथा "न काश्यां मरणं प्राप्तं तस्माद्दुष्प्रतिग्रहात् । प्रान्ते कुटुम्बस्मरणात्तथा काशीस्मृतेरपि । चौरैर्हतोऽपि स तदा कीकटे कुक्कुटोऽभवत् । सा कुक्कुटी सुतौ तौ तु ताम्रचूडत्वमापतुः । प्रान्ते काशीस्मरणतो जाता जातिस्मृतिः पुरा । इत्थं बहुतिथे काले गते कार्पटिकोत्तमाः । तस्मिन्नेवाध्वनि प्राप्तास्त्वारो यत्र कुक्कुटाः । वाराणस्याः कथां प्रोच्चैः कुर्वन्तोऽन्योन्यमेव हि । काशीकथां समाकर्ण्य तदा ते चरणायुधाः । जातिस्मृतिप्रभावेन तत्सङ्गेन तु निर्गताः । तैश्च कार्पटिकश्रेष्ठैः पथि दृष्टाः कृपालुभिः । तण्डुलादिपरिक्षेपैः प्रापिताः क्षेत्रमुत्तमम् । ते तु क्षेत्रं समासाद्य चत्वारश्चरणायुधाः । चरिष्यन्तोऽत्र परितो मुक्तिमण्डपमुत्तमम् । जिताहारान् सनियमान् कामक्रोधपराङ्मुखान् । अटवतः सत्कथालापान् लोभमोहविवर्ज्जितान् । स्वर्धुनीस्नानसंक्लिन्नसुनिर्मलशिरोरुहान् । मन्नामोच्चारणपरान् मत्कथार्पितसुश्रुतीन् । मद्भक्तचित्तसद्वृत्तीन् दृष्ट्वा क्षेत्रनिवासिनः । मानयामासुरथ तान् कुक्कुटान् साधुवर्त्मनः । आक्रन्दाद्दासनायोगात् संप्रधार्य्य परस्परम् । क्रमेणाहारमाकुञ्च्य प्राणांस्त्यक्ष्यन्ति चात्र ते । पश्यतां सर्व्वलोकानां विष्णो ! ते मदनुग्रहात् । विमानमधिरुह्याशु कैलासं प्राप्य मत्पदम् । निर्विश्य सुचिरं कालं दिव्यान् भोगाननुत्तमान् । ततोऽत्र ज्ञानिनो भूत्वा मुक्तिं प्राप्स्यन्ति शाश्वतीम् । ततो लोकास्तदारभ्य कथयिष्यन्ति सर्व्वतः । मुक्तिमण्डपनामैतदेष कुक्कुटमण्डपः" । [(चट्र) । राजनि०

**कुक्कुटमस्तक** पु० कुक्कुटस्येव मस्तकं शिखा यस्य । चव्ये

**कुक्कुटशिख** पु० कुक्कुटस्य शिखेव शिखा यस्य । कुसुम्भवृक्षे शब्दच० तस्य हि पुष्पाणि कुक्कुटशिखातुल्यानीति तस्य कुक्कुटतुल्यरक्तशिखपुष्पत्वात्तथात्वम्

**कुक्कुटागिरि** पु० कुक्कुटप्रधानोगिरिः किंशुलका० दीर्घः । कुक्कुटप्रधाने पर्वते ।

**कुक्कुटाण्ड** पु० कुक्कुट्या अण्डः पुंवद्भावः । कुक्कुट्याअण्डे

**कुक्कुटाभ** पुंस्त्री कुक्कुट इवाभाति आ+भा—क । कक्कुटचरणतुल्ये सर्पभेदे हेमच० स्त्रियां जातित्वात् ङीष् ।

**कुक्कुटासन** न० "कुक्कुटासनमावक्ष्ये नाडीनिर्म्मलहेतुना । सत्कुलागममार्गेण कुर्य्यात् वायुनिरोधनम् । निजहस्तद्वयं भूमौ पातयित्वा जितेन्द्रियः । पद्भ्यां बद्धं यत् करोति कर्पूरद्वयमध्यगम् । सव्यापसव्ययुगलं तत्कुक्कुटासनमुच्यते" इति रुद्रयामलोक्ते आसनभेदे [हेमच० ।

**कुक्कुटाहि** पु० कुक्कुट इव तच्चरणइवाहिः । सर्पभेदे

**कुक्कुटि** स्त्री कुक्कुट इवाचरति कुक्कुट+आचारार्थे क्विप् ततः इन् । दम्भचर्य्यायाम् हेमच० । वा ङीप् । तत्रैव । सा च २कुक्कुटजातिस्त्रियाम् ३ज्येष्ठ्याम् (टिक्टिकी) कीटभेदे शब्दरत्ना० । ४शाल्मलीवृक्षे जटा०

**कुक्कुभ** पु० कुक् इत्यव्यक्तं शब्दं कौति कु—भक् । वन